श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री स्कन्दपुराणे

# ॥ श्री लक्ष्मी चतुर्विंशति स्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मी चतुर्विंशति स्तोत्रम् ॥

देवा ऊचुः

नमः श्रियै लोकधात्र्यै ब्रह्ममात्रे नमो नमः।
नमस्ते पद्मनेत्रायै पद्ममुख्यै नमो नमः ॥ 1 ॥

प्रसन्नमुखपद्मायै पद्मकान्त्यै नमो नमः।
नमो बिल्ववनस्थायै विष्णुपत्न्यै नमो नमः ॥ 2 ॥

विचित्रक्षौमधारिण्यै पृथुश्रोण्यै नमो नमः।
पक्वबिल्वफलापीनतुङ्गस्तन्यै नमो नमः ॥ 3 ॥

सुरक्तपद्मपत्राभकरपादतले शुभे।
सुरत्नाङ्गदकेयूरकाञ्चीनूपुरशोभिते ॥ 4 ॥

यक्षकर्दमसंलिप्तसर्वाङ्गे कटकोज्ज्वले ॥ 5 ॥

माङ्गल्याभरणैश्चित्रैर्मुक्ताहारैर्विभूषिते।
ताटङ्कैरवतंसैश्च शोभमानमुखाम्बुजे ॥ 6 ॥

पद्महस्ते नमस्तुभ्यं प्रसीद हरिवल्लभे।
ऋग्यजुस्सामरूपायै विद्यायै ते नमो नमः ॥ 7 ॥

प्रसीदास्मान्कृपादृष्टिपातैरालोकयाब्धिजे।
ये दृष्टास्ते त्वया ब्रह्मरुद्रेन्द्रत्वं समाप्नुयुः ॥ 8 ॥

श्रीशुक उवाच
इति स्तुता तदा देवैर्विष्णुवक्षस्स्थलालया।
विष्णुना सह संदृश्या रमा प्रीताऽवदत्सुरान्॥ **9** ॥

श्रीरुवाच
सुरारीन्सहसा हत्वा स्वपदानि गमिष्यथ।
ये स्थानहीनाः स्वस्थानाद् भ्रंशिता ये नरा भुवि॥ **10** ॥

ते मामनेन स्तोत्रेण स्तुत्वा स्थानमवाप्नुयुः।
अखण्डैर्बिल्वपत्रैर्मामर्चयन्ति नरा भुवि॥ **11** ॥

स्तोत्रेणाऽनेन ये देवा नरा युष्मत्कृतेन वै।
धर्मार्थकाममोक्षाणामाकरास्ते भवन्ति वै॥ **12** ॥

इदं पद्मसरो देवा ये केचन नरा भुवि।
प्राप्य स्नानङ्करिष्यन्ति मांस्तुत्वा विष्णुवल्लभाम्॥ **13** ॥

तेऽपि श्रियं दीर्घमायुर्विद्यां पुत्रान्सुवर्चसः।
लब्ध्वा भोगांश्च भुक्त्वाऽन्ते नरा मोक्षमवाप्नुयुः॥ **14** ॥

इति दत्त्वा वरं देवी देवेन सह विष्णुना।
आरुह्य गरुडेशानं वैकुण्ठस्थानमाययौ॥ **15** ॥

॥ श्री लक्ष्मी चतुर्विंशति स्तोत्रं समाप्तम्॥